॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ४९

उषित्वा रजनीं तत्र राजपुत्रावरिन्दमौ ।
महर्षिमभिवाद्याथ जग्मतुस्तं गिरिं प्रति ॥१॥

प्रस्थितांश्चैव तान्प्रेक्ष्य पिता पुत्रानिवान्वगात् ।
ततः प्रचक्रमे वक्तुं वचनं स महामुनिः ॥२॥

अथासाद्य तु कालिन्दीं शीघ्रस्रोतसमापगाम् ।
तत्र यूयं प्लवं कृत्वा तरतांशुमतीं नदीम् ॥३॥

ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम् ।
विवृद्धं बहुभिर्वृक्षैः श्यामं सिद्धोपसेवितम् ॥४॥

क्रोशमात्रं ततो गत्वा नीलं द्रक्ष्यथ काननम् ।
पलाशबदरीमिश्रं राम वंशैश्च यामुनैः ॥५॥

स पन्थाश्चित्रकूटस्य गतः सुबहुशो मया ।
रम्यो मार्दवयुक्तश्च वनदावैर्विवर्जितः ।
इति पन्थानमावेद्य महर्षिः स न्यवर्तत ॥६॥

उपावृत्ते मुनौ तस्मिन्रामो लक्ष्मणमब्रवीत् ।
कृतपुण्याः स्म सौमित्रे मुनिर्यन्नोऽनुकम्पते ॥७॥

इति तौ पुरुषव्याघ्रौ मन्त्रयित्वा मनस्विनौ ।
सीतामेवाग्रतः कृत्वा कालिन्दीं जग्मतुर्नदीम् ॥८॥

तौ काष्ठसङ्घाटमथो चक्रतुः सुमहाप्लवम् ।
चकार लक्ष्मणश्छित्त्वा सीतायाः सुखमानसं ॥९॥

तत्र श्रियमिवाचिन्त्यां रामो दाशरथिः प्रियाम् ।
ईषत्संलज्जमानां तामध्यारोपयत प्लवम् ॥१०॥

ततः प्लवेनांशुमतीं शीघ्रगामूर्मिमालिनीम् ।
तीरजैर्बहुभिर्वृक्षैः सन्तेरुर्यमुनां नदीम् ॥११॥

ते तीर्णाः प्लवमुत्सृज्य प्रस्थाय यमुनावनात् ।
श्यामं न्यग्रोधमासेदुः शीतलं हरितच्छदम् ॥१२॥

कौसल्यां चैव पश्येयं सुमित्रां च यशस्विनीम् ।
इति सीताञ्जलिं कृत्वा पर्यगच्छद्वनस्पतिम् ॥१३॥

क्रोशमात्रं ततो गत्वा भ्रातरौ रामलक्ष्मणौ ।
बहून्मेध्यान्मृगान्हत्वा चेरतुर्यमुनावने ॥१४॥

विहृत्य ते बर्हिणपूगनादिते
शुभे वने वारणवानरायुते ।
समं नदीवप्रमुपेत्य संमतं
निवासमाजग्मुरदीनदर्शनः ॥१५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com